
# पञ्चमः पाठः  स एव परमाणुः ।

विश्वस्य उत्पत्तिविषये नैके सिद्धान्ताः प्रतिपादिताः। नैके प्राचीनाः सिद्धान्ताः कालवशतां गताः नैके नूतनाः च वैज्ञानिकैः स्वीकृताः। 'Atom' इति शब्दः सर्वेषां सुपरिचितः एव। आधुनिकविज्ञानशास्त्रे 'Atom' इति मूलकारणं द्रव्यस्य । स एव 'Element' इति मन्यते । प्राचीनशास्त्रे तु 'परमाणुः' निर्मितेः मूलकारणम् इति कथितम् । परमाणोः वैशिष्ट्यानि महर्षिणा कणादमहोदयेन वैशेषिकदर्शने कथितानि । अस्मिन् विषये अधिकं संशोधनं शक्यम् ।




(अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । तस्य पिता विज्ञानस्य प्राध्यापकः । सः पुस्तकपठने मग्नः। तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते ।)

अर्णवः – पितः, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया । कियन्तः सूक्ष्माः तस्य परागकणाः !

पिता – सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि ! (अर्णवः तथा करोति ।)

पिता – किं दृष्टं त्वया ?



अर्णवः – पितः, अद्भुतम् एतत् । अत्र परागकणस्य सूक्ष्माणि अङ्गानि दृश्यन्ते।

पिता – अर्णव, एतानि पुष्पस्य अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि। परन्तु एतद् विश्वं परमाणुभ्यः निर्मितम्। ते परमाणवः तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते ।

अर्णवः – परमाणुः नाम किम् ?

पिता – अस्तु । कथयामि । मुष्टिमात्रान् तण्डुलान् महानसतः आनय ।

अर्णवः – (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, भवान् ।

पिता – अधुना इमं तण्डुलं विभज ।

अर्णवः – तात, कियान् लघुः अस्ति एषः । पश्यतु, एतस्य भागद्वयं यथाकथमपि कृतं मया ।

पिता – इतोऽपि लघुतरः भागः कर्तुं शक्यते वा ?

अर्णवः – यदि क्रियते तर्हि चूर्णं भवेत् तस्य ।

पिता – सम्यग् उक्तं त्वया । यत्र एतद् विभाजनं समाप्यते, यस्मात् सूक्ष्मतरः भागः प्राप्तुं न शक्यते सः एव परमः अणुः ।

अर्णवः – द्रव्यस्य अन्तिमः घटकः मूलं तत्त्वं च परमाणुः, सत्यं खलु ?

पिता – सत्यम् । अयं खलु कणादमहर्षेः सिद्धान्तः । अपि जानासि ? परमाणुः द्रव्यस्य मूलकारणम् इति तेन महर्षिणा प्रतिपादितम् । तदपि प्रायः ख्रिस्तपूर्वं पञ्चमे षष्ठे वा शतके ।

अर्णवः – तात, महर्षिणा कणादेन किं किम् उक्तं परमाणुविषये ? वयं तु केवलं तस्य महाभागस्य नामधेयम् एव जानीमः ।


पिता – कणादमुनिना प्रतिपादितम् – परमाणुः अतीन्द्रियः, सूक्ष्मः, निरवयवः, नित्यः, स्वयं व्यावर्तकः च। 'वैशेषिकसूत्राणि' इति स्वग्रन्थे तेन परमाणोः व्याख्या कृता ।

अर्णवः – का सा व्याख्या?

पिता – **जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।**
**तस्य षष्ठतमो भागः परमाणुः स उच्यते ॥**

अर्णवः – अहम् एतद्विषये विस्तरेण पठितुम् इच्छामि ।

पिता – उत्तमम्! श्वः मम महाविद्यालयम् आगच्छ । तत्र कणादविषयकाणि नैकानि पुस्तकानि सन्ति । तव जिज्ञासा निश्चयेन शाम्येत् ।



## भाषाभ्यासः

**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) अर्णवः पाकगृहात् किम् आनयति?

आ) कः परमाणुः?

इ) परमाणुसिद्धान्तः केन महर्षिणा कथितः?

ई) महर्षिणा कणादेन परमाणुविषये किं प्रतिपादितम्?

उ) महर्षेः कणादस्य मतानुसारं परमाणोः व्याख्या का?

**२. सूचनानुसारं कृतीः कुरुत ।**

अ) अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । (पूर्वकालवाचकम् अव्ययं निष्कासयत ।)

आ) किं दृष्टं त्वया? (वाच्यपरिवर्तनं कुरुत ।)

इ) वयं तु केवलं तस्य महाभागस्य नामधेयं जानीमः । (वाक्यम् एकवचने परिवर्तयत।)

ई) अहं विस्तरेण पठितुम् इच्छामि । (वाक्यं लङ्लकारे परिवर्तयत ।)

उ) महाविद्यालये कणादविषयकाणि पुस्तकानि सन्ति। (वाक्यम् एकवचने परिवर्तयत ।)

ऊ) भवान् स्वीकरोतु । ('भवान्' स्थाने 'त्वं' योजयत ।)


ए) त्वं द्रष्टुं शक्नोषि । ('त्वं' स्थाने 'भवान्' योजयत ।)

ऐ) महर्षिणा परमाणोः व्याख्या कृता । (वाच्यपरिवर्तनं कुरुत ।)

ओ) वयं महाभागस्य नामधेयं जानीमः । (वाच्यपरिवर्तनं कुरुत ।)

औ) सम्यग् उक्तं त्वया । (वाच्यपरिवर्तनं कुरुत ।)

**३. जालरेखाचित्रं पूरयत**




**४. माध्यमभाषया उत्तरं लिखत ।**

अ) महर्षिः कणादः परमाणुविषये किं प्रतिपादितवान्?

आ) 'तण्डुलान् आनय' इति पिता अर्णवं किमर्थम् आदिष्टवान्?

**५. समानार्थकशब्दान् लिखत ।**

कुसुमम्, विश्वम्, पिता, नामधेयम्, सूर्यः ।

**६. विरुद्धार्थकशब्दान् मञ्जूषातः अन्विष्य लिखत ।**

सत्यम्, अन्तिमः, अनित्यः, लघुः, सूक्ष्मः,

(आद्यः, गुरुः, नित्यः, असत्यम्, स्थूलः)

### ७. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।

अ) एतद् विश्वं ______ निर्मितम् । (तण्डुलै:/अणुभि:)

आ) ______ द्रव्यस्य मूलकारणम् । (परमाणु:/विज्ञानं)

इ) रजस: ______ भाग: परमाणु: । (षष्ठतम:/शततम:)

### ८. नामतालिकां पूरयत ।

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ______ | ब्रह्मभ्याम् | ______ | तृतीया |
| ______ | ______ | वर्त्मानि | प्रथमा |
| ग्राव्णे | ______ | ______ | चतुर्थी |

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| संन्यासिनि | ______ | ______ | सप्तमी |
| ______ | ______ | बलवत: | द्वितीया |
| ______ | त्वचो: | ______ | षष्ठी |

### ९. क्रियापदतालिकां पूरयत ।

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| ______ | जीवत: | ______ | प्रथम: | लट् |
| ______ | ______ | अभाषध्वम् | मध्यम: | लङ् |
| मुञ्चानि | ______ | ______ | उत्तम: | लोट् |

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| स्पृहयेत् | ______ | ______ | प्रथम: | विधिलिङ् |
| ______ | धारयेथाम् | ______ | मध्यम: | लोट् |
| ______ | ______ | चिन्तयामहै | उत्तम: | लोट् |

**उपक्रम: –** पितु: महाविद्यालयं गत्वा अर्णवेन कणादविषये कानि कानि पुस्तकानि दृष्टानि? तेन पित्रा सह का चर्चा कृता? इत्यस्य विषये संवादं रचयत ।

**क्रीडत–नन्दत**

**वाक्यनिर्माणम्**

बालानां पञ्च षट् वा गणा: करणीया: । सर्वेऽपि निश्चिते स्थले उपविशेयु: । प्रतिगणं द्वौ त्रय: वा बाला: भवेयु: । शिक्षक: प्रतिगणं काञ्चन (पञ्चदश) चिटिका: दद्यात् । तासु प्रत्येकं चिटिकायाम् अपि एक: शब्द: तेन पूर्वमेव लिखित: भवति । तेषु शब्देषु केचन कर्तृवाचका:, केचन कर्मवाचका: अन्ये केचन क्रियावाचकाश्च भवेयु: । बालै: तेषां शब्दानाम् उपयोगेन निर्दिष्टे कालावधौ वाक्यानि रचनीयानि। (सर्वे मिलित्वा वाक्यानि चिन्तयेयु:, तेषु अन्यतम: तानि लिखेत् ।) य: गण: अधिकानि वाक्यानि रचयति तस्य जय: भवति। प्रतिवाक्यं कर्तृ–कर्म–क्रियासहितं भवेत् इति पूर्वमेव सूचना दातव्या । – क्रीडावल्ली–पुस्तकात् ।

72TYXJ